**श्रीसुरसरस्वतीसभा, शृङ्गेरी**

**तृतीया परीक्षा - प्रथमपत्रिका**

**दिनाङ्कः** – 31-08-2025 **अङ्काः** – १००

**पूर्वाह्णः** – १०:०० तः १:०० पर्यन्तम् **समयः** – होरात्रयम्

ಸೂಚನೆಗಳು: ೧. ಸಂಸ್ಕೃತದಲ್ಲಿ ಬರೆಯುವ ಉತ್ತರಗಳು ದೇವನಾಗರೀಲಿಪಿಯಲ್ಲೇ ಇರಬೇಕು.

೨. ಪ್ರಶ್ನೆಗಳ ಕ್ರಮಾಂಕಗಳನ್ನು ತಪ್ಪದೇ ಬರೆಯಿರಿ.

Instructions: 1. Write the Samskrita answers in Devanaagari script only.

2. Write the question numbers correctly.

1. **पञ्चानां संस्कृतेन एकवाक्येन उत्तरं लिखत ।** 5
   1. वाग्देवता स्वहस्तेषु किं किं धारयति ?
   2. भोजस्य कस्मिन् महानादरः आसीत् ?
   3. विक्रम: फलं कस्मै प्रायच्छत् ?
   4. कालटिग्राम: कुत्रास्ति ?
   5. कुरुकुलपितामह: क: ?
   6. नयशास्त्रकर्तार: के ?

2. **षण्णां द्वित्रै: वाक्यै: उत्तरं लिखत ।** 12
   1. हनुमान् समुद्रस्योपरि किं किं चकार ?
   2. धीराः कस्मात् पदं न प्रविचलन्ति ?
   3. गणेशं के कदा नमस्कुर्वन्ति ?
   4. गोप्यानि कानि ?
   5. केषां बन्धनं भवति ?
   6. कीदृशौ सुतौ वरम् ?
   7. मानवेन नित्यं किमालोचनीयम् ?

3. **त्रयाणां पञ्चषै: वाक्यै: संस्कृतेन उत्तरं लिखत ।** 9
   1. श्रीशङ्कराचार्यैः कुत्र कुत्र मठाः स्थापिताः ? कुतः ?
   2. सुमतेरभिप्रायं विवृणुत ।
   3. गृहिणी द्विजं किमवदत् ?
   4. भुजङ्गम: रोषात् किमकरोत् ? परिणाम: किमभवत् ?

4. **चतुर्णां मातृभाषया दशभिः वाक्यैः उत्तरं लिखत ।** 12

1. एकलव्यस्य गुरुभक्तिं वर्णयत।
2. श्रीशङ्करभगवत्पादानां चरितं सङ्गृह्य लिखत ।
3. विक्रमस्यौदार्यं विशदयत।
4. ‘ ब्राह्मणः सर्पश्च ’ कथां लिखत।
5. ‘आहारशुद्धौ सत्वशुद्धिः’ कथां लिखत।

5. **चतुर्णां ससन्दर्भं मातृभाषया विवृणुत ।** 12

1. " स एव कवीनां चक्रवर्तीति परिगण्यते " ।
2. " न हि किञ्चित् गुरवे अदेयम् " ।
3. " केवलं जगति तेऽपि राक्षसाः " ।
4. " वशमेष्यन्ति मे तदा ” ।
5. " तदनन्तरं यद्भावि तद्भवतु " ।

6. **द्वयोः अन्वयानुसारम् अर्थं मातृभाषया लिखत ।** 4

१. नमस्त्रिमूर्तये तुभ्यं प्राक्सृष्टेः केवलात्मने। ।
गुणत्रयविभागाय पश्चाद्भेदमुपेयुषे ॥

२. मा विषादं कृथा देवि राघवो रावणं रणे ।
हत्वा त्वां नेष्यतीत्येनामाश्वास्य स विनिर्ययौ ।।

३. यथा कन्दुकपातेनोत्पतत्यार्यः पतन्नपि ।
तथा त्वनार्यः पतति मृत्पिण्डपतनं यथा ॥

7. **श्लोकद्वयं पूरयत ।** 4

1. प्रत्यहं ------------------- पुरुषैरिति ॥ 2. राजा ------------------- वेत्ति॥

3. आद्याया -------------- शाम्भवे ॥

8. **अस्य गद्यभागस्य अनुवादं कुरुत।** 3

ततो राजा विष्णुशर्माणमाहूय प्रोवाच - भो भगवन् ! मदनुग्रहार्थे एतानर्थशास्त्रं प्रति द्राक् यथाऽनन्यसदृशान् विदधासि तथा कुरु। तदाहं त्वां प्रभूतधनेन योजयिष्यामि।

**9. रिक्तस्थानानि पूरयत ।** 3

1. जगदिदं परिदृस्यमानं ____________ कल्पमिति ।

2. ---------------- वचनं ग्राह्यमापत्काले ।

3. नूनमेषा -------------- मया कदाचिदपि न पूजिता ।

**10. त्रयाणां पर्यायपदानि लिखत ।** 3

1. आननम् 2. देवा: 3. भूसुर: 4. शारदा

**11. त्रयाणां विरुद्धपदानि लिखत ।** 3

1. गोप्यम् 2. सृष्टि: 3. हित: 4. प्रकाश:

**12. त्रीणि पदानि संस्कृतवाक्येषु योजयत ।** 3

1. वेत्ति 2. शाश्वत: 3. प्राक् 4. गृहीत्वा

**13. त्रयाणां सन्धिं विभज्य सन्धिनाम लिखत ।** 3

1. जगद्गुरु: 2. इत्येनाम् 3. तट्टीका 4. चिन्मय:

**14. वाक्यदोषं परिहरत । (त्रयाणाम् एव)** 3

1. अहम् इमं गिरिं वहति। 2. त्वं पूजां करोतु ।

3. रामः पुत्रस्य सह भगवद्गीता पठति। 4. बालः विद्यालयात् अगत्वा क्रीडति।

**15. सुबन्त-तिङन्त-अव्ययानि पृथक् कृत्वा लिखत ।** (द्वावेव) 3

1. अहं कार्यालयं गमिष्यामि।

2. त्वं मिथिलानगरीं गत्वा धर्मव्याधं धर्मस्य तत्त्वं पृच्छ ।

3. राजा विक्रमो भवन्तम् आह्वयति।

**16. लोकोक्तिं पूरयित्वा मातृभाषया विवृणुत। (द्वयोः)** 4

1. निरीहाणां ------- विषय: । 2. स्निग्ध -------- भवति । 3. यादृशं ----- तादृशी।

**17. संयोज्य लिखत ।** 4

| **अ** | **आ** |
|---|---|
| सम्प्रति | भुजाः |
| मस्करी | वसत |
| दोरः | अव्ययम् |
| लोट् | ज्ञानी |
| | द्वाराणि |

18. **व्याकरणविशेषं लिखत ।** 2

1. विषादं मा कृथाः 2. रामाय नमः

19. **रेखाङ्कितपदमधिकृत्य प्रश्नवाक्यं कुरुत।** 2

1. द्रोणाचार्यः कौरवपण्डवान् <u>विद्यायां</u> परिणतान् अकरोत् ।

2. कौशिकः वृक्षमूले <u>वेदान्</u> पठन् स्थितः ।

20. **समूहेतरपदं पृथक् कृत्वा लिखत।** 2

1. आत्मन् , राजन्, नामन्, गुणिन् । 2. शङ्करः, हरिः, ईशः, हरः ।

21. **चतुर्थपदं लिखत।** 2

1. तुराषाट् – इन्द्रः :: दिवौकसः – ------------

2. क्षीयते – लट् :: गच्छतु – ------------

22. **प्रयोगपरिवर्तनं कुरुत।** 2

1. पुत्रेण क्षीरम् अपीयत । 2. सा कथां श्रृणोति ।

*************